अभ्यासार्थ प्रश्नपत्र (2022–23)

Class: 10th **Code B**

Roll No. | | | | | | | | | | |

संस्कृत

**Sanskrit**

ACADEMIC/OPEN

समय : 3 घण्टे पूर्णांक – 80

- कृपया जांच कर लें कि इस प्रश्न–पत्र में मुद्रित पृष्ठ 7 तथा प्रश्न 17 हैं।
- प्रश्न–पत्र में दाहिने हाथ की ओर दिये गए कोड नम्बर तथा सेट को छात्र उत्तर–पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।
- उत्तर–पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।
- उत्तर पुस्तिका के अतिरिक्त कोई अन्य उत्तर–पुस्तिका नहीं दी जाएगी। अतः आवश्यकतानुसार ही लिखें और लिखित उत्तर को न काटें।
- परोक्षार्थी प्रश्न–पत्र पर अपना रोल नम्बर अवश्य लिखें।
- प्रश्नों के उत्तर देने से पहले यह सुनिश्चित कर ले कि आपको सही और पूर्ण प्रश्न–पत्र दिया गया है, परीक्षा के बाद इस सम्बन्ध में कोई दावा मान्य नहीं होगा।

निर्देशः–

- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- श्रेष्ठ–अंकानां प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।

(खण्ड–क) अपठित–अवबोधनम्

1. अधोलिखितं गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत– 5x2=10

एकस्मिन् वने एकः विशालः वटवृक्षः तिष्ठति स्म। तस्मिन् अनेके खगाः न्यवसन्। ते भोजनार्थं प्रतिदिनम् इतस्ततः गच्छन्ति स्म। एकदा व्याधेन तण्डुलान् क्षिप्त्वा पाशः प्रसारितः। खगाः तण्डुलान् खादितुं अधः आगत्य जाले बद्धाः अभवन्। खगाधिपः विमृष्य मित्रैः सह सजालम् उड्डीय मित्रं मूषकं हिरण्यकम् उपागच्छत्। मूषकः जालम् अकर्तत्। ते स्वतन्त्रताम् आप्नुवन्।

(क) विशालः वटवृक्षः कुत्र तिष्ठति स्म ?

(ख) के भोजनार्थम् इतस्ततः गच्छन्ति स्म ?

(ग) खगाः कस्मिन् बद्धाः अभवन् ?

(घ) वटवृक्षः कीदृशः आसीत् ?

(ङ) मूषकः किम् अकरोत् ?

(खण्ड–ख) रचनात्मकं–कार्यम्

2. भवान् नरेन्द्रः। स्वाध्ययनविषये पितरं प्रति लिखिते पत्रे रिक्तस्थानानि उचितमञ्जूषापदैः पूरयत–

4x1=4

मञ्जूषाः– | मम, पठितानां, सुखेन, विषये।

पूजनीय पितः ।

सादरं प्रणमामि।

अत्र कुशलं तत्रास्तु। अहं छात्रावासे ................ (1) ................. निवसामि। अत्र अहं प्रायः पंचवादने उत्थाय ....................(2).................. पाठानाम् आवृत्तिं प्रतिदिनं करोमि। मम ....................(3)................. भवान् चिन्तां मा करोतु। मातृचरणकमलयोः .......................(4)................ प्रणामाः। भ्रात्रे शुभाशीषः।

भवतां प्रिय सुतः

नरेन्द्रः।

3. निदिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानि पूरयित्वा लिखत।

4x1=4

मञ्जूषाः– | सन्ति, भवति, चालयतः, छत्रम्।



1. अस्मिन् चित्रे वृष्टिः .................... ।

2. बालकौ जले कर्गदनौके ................... ।

3. एकः बालकः एका बालिका च ................. धृत्वा गच्छतः।

4. आकाशे मेघाः .......................... ।

अथवा

(केवलं प्रज्ञाचक्षुर्भ्यः)

'मम विद्यालयः' इति विषयम् अधिकृत्य चत्वारि वाक्यानि संस्कृतभाषायां लिखत।

(खण्ड–ग) पठित–अवबोधनम्

4. निम्नलिखितं गद्यांशं पठित्वा सप्रसंगं हिन्दी–भाषायां सरलार्थं लिखत। 4x1=4

व्याघ्रः – गच्छ, गच्छ जम्बुक! त्वमपि किंचिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहम् हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

अथवा

रामः – युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

5. अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थं लिखत– 4x1=4

आलस्यं हिं मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

अथवा

रे रे चातक! सवधानमनसा मित्र क्षणं श्रूयता–

मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।

केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,

यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः।।

6. अधः प्रदत्तसूक्तिषु द्वयोः भावार्थः हिन्दीभाषायां लेखनीयः– 2x2=4

1. वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
2. अहो ! हृदयग्राही स्पर्शः।
3. व्याधयः नोपसर्पन्ति वैनतेयमिवोरगाः।
4. विचित्रे खलु संसारे नास्ति किंचिन्निरर्थकम्।

7. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 3x1=3

ज्वालामुखर्पवतानां विस्फोटैरपि भूकम्पो जायत इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिकाशिलादिसञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति।

(क) केषां विस्फोटैः भूकम्पो जायते ?

(ख) अग्निः शिलादिसञ्चयं किं करोति ?

(ग) भूकम्पविशेषज्ञाः किं कथयन्ति ?

8. निम्नश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 2x1=2

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मासं च व्यायामाभिरतस्य च।।

1. व्यायामिनं का न समधिरोहति ?
2. स्थिरं किं भवति ?

9. रेखाकिंतपदानि आधृत्य प्रश्ननिर्माणं कुरूत— 1x3=3

(क) त्वं मानुषात् विभेषि।

(ख) तदिदानीं भूकम्पकारणं विचारणीयं तिष्ठति।

(ग) सः भारवेदनया क्रन्दति स्म।

10. प्रश्नपत्रे लिखितान् श्लोकान् विहाय "शेमुषी भाग–2" पुस्तकात् एकं श्लोकं संस्कृतभाषायां लिखत।

1x4=4

(खण्ड–घ) अनप्रयुक्तं व्याकरणम्

11. (क) कर्मकारकस्य अथवा अपदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 1x2=2

(ख) विसर्गसन्धेः अथवा स्वरसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 1x2=2

(ग) तत्पुरुषसमासस्य अथवा अव्ययीभावसमासस्य परिभाषा सोदाहरणं हिन्दीभाषायां लिखत। 1x2=2

12. यथानिर्दिष्टं शब्दरूपाणि लिखत– 4X1=4

(क) 'राम' शब्दस्य षष्ठी बहुवचने।

(ख) 'नदी' शब्दस्य चतुर्थी एकवचने।

(ग) 'हरि' शब्दस्य सप्तमी द्विवचने।

(घ) 'भगवत्' शब्दस्य प्रथमा एकवचने।

13. यथानिर्दिष्टं धातुरूपाणि लिखत– 4X1=4

(क) 'अस्' लट्लकार, प्र.पु. बहुवचने।

(ख) 'गम्' लट्लकार, म.पु. बहुवचने।

(ग) 'दृश्' लोट्लकार, उ.पु. एकवचने।

(घ) 'रुच्' लट्लकार, म.पु. एकवचने।

14. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत– 4X1=4

(क) .............................. बलिः। (भूतस्य, भूतेभ्यः)

(ख) ..................... परितः वृक्षाः सन्ति। (ग्रामेण, ग्रामं)

(ग) पिता ............................ सह गच्छति। (पुत्रात्, पुत्रेण)

(घ) ............................ स्वस्ति। (नृप, नृपाय)

15. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत– 2X1=2

1. कोलाहलं .................... कुरु। (सदा, मा)
2. कृपया .................. वदतु। (पुनः, कुत्र)

16. अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत– 2X1=2

(क) अनुकरोति (ख) उपहारः

(खण्ड–ङ) बहुविकल्पीय–प्रश्नाः

17. अधोनिर्दिष्टषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु एकं शुद्धं उत्तरं लिखत– 16x1=16

(i) 'गावः + च' अत्र किं सन्धियुक्तम्?

(क) गावश्च (ख) गाश्च (ग) गावच (घ) गौश्च

(ii) 'सु + आगतम्' अत्र किं सन्धियुक्तम् ?

(क) सुवागतम् (ख) स्वागतम् (ग) सुआगतम् (घ) सवागतम्

(iii) 'राजपुरुष' इति पदस्य विग्रहपद किम् ?

(क) राज्ञा पुरुषः (ख) राज्ञः पुरुषः (ग) राज पुरुषः (घ) राज्ञ पुरुषः

(iv) 'उपनदि' इति पदे कः समासः ?

(क) द्वन्द्व (ख) बहुव्रीहि (ग) द्विगु (घ) अव्ययीभाव

(v) 'दुःखदः' इति पदस्य विलोमपदं किम् ?

(क) सुकरः (ख) सुखदः (ग) दुर्लभः (घ) दुर्लभा

(vi) 'दोषः' इति पदस्य विलोमपदं किम् ?

(क) गुणाः (ख) गुणः (ग) दोषाः (घ) दोषः

(vii) 'सलिलम्' इति पदस्य पर्यायपदं किम् ?

(क) रसातलम् (ख) तक्रम् (ग) जलम् (घ) पाषाणम्

(viii) 'नगरम्' इति पदस्य पर्यायपदं किम् ?

(क) वनम् (ख) उपवनम् (ग) काननम् (घ) पत्तनम्

(ix) 'समाज + ठक्' इति संयोगे किं रूपम् ?

(क) सामाजिकः (ख) समाजिक (ग) समाजक (घ) समाजी

(x) 'स्थातव्यम्' इति पदे कः प्रत्ययः ?

(क) तव्यत् (ख) क्त (ग) अनीयर (घ) क्त्वा

(xi) 'नवत्रिंशत्' इति पदे का संख्या ?

(क) 39 (ख) 25 (ग) 15 (घ) 45

(xii) '30' इति अंके किं संख्याववाचिपदम् ?

(क) विंशतिः (ख) त्रिंशत् (ग) विशतीः (घ) चतुर्विंशति

(xiii) 'अतिदीर्घः प्रवासः' अत्र किं विशषणपदम् ?

(क) अतिदीर्घः (ख) प्रवासः (ग) अति (घ) दीर्घः

(xiv) 'उदात्तरम्यः समुदाचारः' अत्र किं विशेष्यपदम् ?

(क) उदात्तरम्यः (ख) समुदाचारः (ग) उदात्त (घ) रम्यः

(xv) बालकः प्रातः ...........(5:00)......... उत्तिष्ठति। (उचितपदेन रिक्तस्थानं पूरयत)

(क) त्रिवादने (ख) पंचवादने (ग) एकादशवादने (घ) सप्तवादने

(xvi) अहं प्रातः ...........(6:00)......... भ्रमणाय गच्छामि। (उचितपदेन रिक्तस्थानं पूरयत)

(क) सप्तवादने (ख) अष्टवादने (ग) नववादने (घ) षड्वादने